# श्री गणेश स्तवं

चतु:षष्टि कोटयाख्य विद्याप्रदं त्वां सुराचार्य विद्याप्रदाना पदानम् |
कठाभीष्ट विद्यार्पकं दन्तयुग्मं कविं बुद्धिनाथं कवीनां नमामि || १ ||

स्वनाथं प्रधानं महाविघ्ननाथं निजेच्छाविसृष्टाण्डवृन्देश नाथम् |
प्रभुं दक्षिणास्यस्य विद्याप्रदं त्वां कविं बुद्धिनाथं कवीनां नमामि || २ ||

विभो व्यासशिष्यादि विद्याविशिष्टप्रियानेकविद्याप्रदातारमाद्यम् |
महाशाक्त दीक्षागुरुं श्रेष्ठदं त्वां कविं बुद्धिनाथं कवीनां नमामि || ३ ||

विधात्रे त्रयीमुख्यवेदां श्च योगं महाविष्णवे चागमात्र् शंकराय |
दिशन्तं च सूर्याय विद्यारहस्यं कविं बुद्धिनाथं कवीनां नमामि || ४ ||

महाबुद्धिपुत्राय चैकं पुराणं दिशन्तं गजास्यस्य माहात्म्ययुक्तम् |
निजज्ञान शक्त्या समेतं पुराणं कविं बुद्धिनाथं कवीनां नमामि || ५ ||

त्रयीशीर्षसारं रुचानेकमारं रमाबुद्धिदारं परं ब्रह्मपारम् |
सुरस्तोमकायं गणौघाधिनाथं कविं बुद्धिनाथं कवीनां नमामि || ६ ||

चिदानन्दरूपं मुनिध्येयरूपं गुणातीतमीशं सुरेशं गणेशम् |
धरानन्दलोकादि वासप्रियं त्वां कविं बुद्धिनाथं कवीनां नमामि || ७ ||

अनेकप्रतारं सुरक्ताब्जहारं परं निर्गुणं विश्वसद्ब्रह्मरूपम् |
महावाक्य संदोह तात्पर्यमूर्ति कविं बुद्धिनाथं कवीनां नमामि || ८ ||

इदं ये तु कव्यष्टकं भक्ति युक्ता स्त्रिसंध्यं पठन्ते गजास्यं स्मरन्त: |
कवित्वं सुवाक्यार्थ मत्यद्भुतं ते लभन्ते प्रसादाद् गणेशस्य मुक्तिम् || ९ ||

|| इति श्री वाल्मीक प्रोक्त गणेश स्तवं सम्पूर्ण ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133